International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2024; 1(4): 61-64
© 2024 IJMH
www.themultijournal.com
Received: 15-10-2024
Accepted: 25-10-2024
Publish : 28-10-2024

**Dr. P. Bhavanarayanacharyulu**
Asst. Professor,
Dept. of Vaikhānasa Āgama,
Sri Venkateswara Vedic-University,Tirupati

**Correspondence:**
**Dr. P. Bhavanarayanacharyulu**
Asst. Professor,
Dept. of Vaikhānasa Āgama,
Sri Venkateswara Vedic-University,Tirupati

# श्रीवैखानसभगवच्छास्त्रे आराधनोपयुक्ततीर्थद्रव्याणां वैज्ञानिकं प्रयोजनम्

**Dr. Parasaram Bhavanarayanacharyulu**

**धन्वन्तरीध्यानश्लोकः -**

**ओं अमृतकलशहस्तं कान्तिसम्पूर्णदेहं सकलविबुधवन्द्यं वेदशास्त्रैर्विचिन्त्यम् ।**
**रुचिरविमलपार्श्वं शङ्खचक्रायुधाढ्यं सकलगदविनाशं चिन्तये वैद्यदेवम् ॥**

**शोधप्रबन्धसारांशः –**

"शरीरमाद्यं खलु धर्मसाधनम्" इति महतामुपदेशः। यावत् पर्यन्तं जीवनकालो भवति तावन्तं कालं शरीरं नीरोगं रक्षणीयम्। **"शतायुर्वै पुरुषः"**[1] इति श्रुतिवचनमनुसृत्य साधारणः जीवनकालः शतं वर्षाणि भवति। स जीवनकालः एव आयुः शब्देन उच्यते।

**आयुर्वेदशब्दार्थः –**

**"आयुर्जीवितकालो ना जीवातुर्जीवनौषधम्"**[2] इत्यमरः। एति इत्यायुः सर्वदा गच्छति इत्यर्थः। तस्य विज्ञाननिरूपकं शास्त्रम् आयुर्वेदः। वदन्ति अनेन इति वेदः। विद-धातुः नानार्थकः वर्तते। आयुर्विन्दते अनेन वा आयुर्वेदः। श्रीमन्नारायणः समुद्रमथनकाले अमृतकलशहस्तः आविर्बभूव। नारायणः एव आयुर्वेदस्य आद्यः पुरुषः इति वेदेषु पुराणेषु च निरूपितः।

**आयुर्वेदाविर्भावक्रमः –**

जगतः सृष्टेः प्राक् श्रीमन्नारायणः आगामिन्यां सृष्टौ समूर्तार्चनं प्रदातुं स्वस्यैवांशया महर्षिं विखनसं सृष्टवान्। विखनसस्य एव द्वितीयं नाम ब्रह्मा, विखनसप्रोक्तेषु कल्पसूत्रेषु सर्वे संस्काराः आयुर्वेदमयाः वर्तन्ते। नारायणात् आयुर्वेदं उपलभ्य ब्रह्मा जगत्सृष्टम् उपचक्राम। देवदानवसंग्रामे पराजितान् देवान् दृष्ट्वा तेषां जरामरणबाधां च दृष्ट्वा देवतानां दुरवस्थां वारयितुम् अथर्वणवेदस्य उपवेदम् आयुर्वेदं स्मृत्वा दक्षप्रजापतिं आयुर्वेदमुपदिदेश। दक्षः अश्विनीभ्यां तां विद्यां दत्तवान्। ताभ्याम् इन्द्रः आयुर्वेदं लब्ध्वा देवलोके सर्वे आयुरारोग्यसम्पन्नाः रेजुः।

भूलोके अपि आयुर्वेदव्याख्या मनुष्यान् अनुग्रहीतुम् इच्छन्तः चत्वारो महर्षयः विखनसस्य शिष्याः भूत्वा साङ्गोपाङ्गम् आयुर्वेदं ब्रह्मणः अधिजग्मुः। ते च भृगुमहर्षिः, अत्रिमहर्षिः, कश्यपमहर्षिः, मरीचिमहर्षिः। विखनसस्य शिष्याः ते वैखानसाः एवं विखनसः विद्यावंशोऽपि वैखानसो बभूव। ततः अगस्त्य भृगु भारद्वाज गौतम आत्रेय प्रभृतयः महर्षयः देवेभ्यः आयुर्वेदं प्राप्य अग्निवेशादीन् उपदिदिशुः।

एवं ते एव महर्षयः श्रीमन्नारायणालयेषु अर्चकाः भूत्वा आयुर्वेदवैद्याश्च आसन्। एवं सर्वम् आयुर्वेदशास्त्रम् आलयेषु वैखानसाधीनमिति Dr. G.N. Mukharji, "History of Ayurveda" इति ग्रन्थे स्पष्टमुक्तवान्।

**आयुर्वेद नारायणार्चनयोः अविनाभावसम्बन्धः –**

मरीचिमहर्षिः स्वकीय विमानार्चनाकल्पग्रन्थे प्रथमपटले आयुर्वेदनारायणार्चनयोः अविनाभावसम्बन्धम् उक्तवान्। **अर्चकस्तु हरिस्साक्षात् चररूपी न संशयः।**
**शरीरे जर्झरीभूते व्याधिग्रस्ते कळेबरे।**
**औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः॥ सुप्रसन्नं परमात्मानं नारायणं ध्यात्वाऽभिवन्द्य श्रुत्यनुकूलेन मार्गेण चतुर्वेदोद्भवैर्मन्त्रैः तमर्चयन्त श्रुतिभिरभिहितं शाश्वतमतीन्द्रियं परात्परतरं देवैरनभिलक्ष्यं तद्विष्णोः परमं पदं गच्छेयुः"**[3] इति प्रतिपादितम्।

**अर्चनाप्राधान्यम् –**

**विष्णुः वै सर्वाः देवताः – "अग्निर्वै देवानामवमः", "विष्णुः परमः"**[4], **तदन्तरेण सर्वाऽन्या देवताः** इति श्रुतिषु विष्णुपारस्म्यमुक्तम्। **"विष्णोः नित्यार्चा सर्वदेवार्चा भवति"**[5] इति तत्प्राशस्त्यं प्रतिपादितम्।

**भगवदाराधनस्य चातुर्विधम् – अथ भगवत्समाराधनं चतुर्विधं भवति। जपहुताऽर्चनध्याना**नीति[6]। तेष्वर्चनं सर्वोत्तमं सर्वक्रतुफलप्रदं शाश्वतमोक्षप्रदमिति स्पष्टम्। अर्चनान्ते ग्राह्यं विष्णुपादतीर्थं मोक्षप्रदम्, आरोग्यप्रदं च भवति। अत्रि प्रोक्ते समूर्तार्चनाधिकरणे अष्टसप्ततितमे अध्याये एवं निरूपितम्।

**तीर्थग्रहणनियमः –**

**स्वयं दक्षिणहस्तेन तीर्थमादाय चत्वारः ।।39।।**
**पतद्ग्रहगतं तीर्थमर्चकः प्रथमं पिबेत् ।40।**
**पश्चात्तत्तीर्थमादाय सर्वेषामपि दापयेत् ।।41।।**
**सर्वेऽप्याश्रमिणस्तत्र तीर्थमेवं पिबन्ति वै ।**
**वस्त्रं चतुर्गुणीकृत्य पाणौ पाणिं निवेश्य च ।।42।।**
**तत्र तीर्थं च संयोज्य त्रिः पिबेद् बिन्दुवर्जितम् ।**
**अविद्या मूलनाशाय जन्मकर्म निवृत्तये ।।43।।**
**ज्ञानवैराग्यसिद्ध्यर्थं विष्णोः पादोदकं शुभम् ।**
**परमाणुसमं तीर्थं महापातकनाशनम्।।44।।**
**आरोग्यमस्तु शुभमस्तु यशोऽस्तु नित्यं-**
**श्रीरस्तु शान्तिरभयं शुभमस्तु विष्णो ।**
**त्वत्पादपङ्कजविनिर्गतपादतोयमास्वादयामि-**
**पुरतो न पुनर्भवाय ।।48-1/2।।**
**तीर्थस्वीकारमहिमज्ञानवान् पुरुषः पिबेत्।**
**व्रतस्थाश्च तपोनिष्ठाः सर्वेऽप्याश्रमिणस्तथा।।50।।**
**तत्पाद्योदकपानेन पूयन्ते चाऽग्निहोत्रिणः।51।**[7]

विष्णवे निवेदितानि तीर्थप्रसादनिर्माल्य चन्दनताम्बूलादीनि वैखानसागमोक्तदिशा विनियुक्तानि भवेयुः। अन्यथा अर्चनं निष्फलं स्यात्। विष्णुपादयोः समर्पितं तीर्थं पाद्यं शिरसि प्रोक्ष्य पिबेत्।

**उपवासदिने यस्तु तीर्थं च तुळसीदळम्।।46।।**
**न प्राश्नीयाद्विमूढात्मा रौरवं नरकं व्रजेत्।**
**एकादश्यां निराहारस्सम्पूज्य तुळसीदळैः।।47।।**
**विष्णुं तत्पादसलिलं पीत्वैवोपविशेन्नरः।48।**[8]

एकादश्याम् उपोषितोपि तीर्थं ग्राह्यं पात्रस्थस्य तीर्थस्य ग्रहणे वस्त्रं चतुर्गुणं संक्षिप्तं कृत्वा वामहस्ते निवेश्य दक्षिणहस्तेन तीर्थं पिबेत्। तीर्थग्रहणेन अज्ञाननाशः जन्मराहित्यं भवति।

**परमाणुसमं तीर्थं महापातकनाशनम्।।44।।**
**तथैवाष्टगुणं पापं तद्भूमौ पतितं यदि।45।**[9]

तीर्थजलं किञ्चिदपि न अधः पातनीयम्। उपवासः स्वीकारे विरमणे च एकादश्यामपि तुलसीदलैः विष्णुं पूजयित्वा उपोषितो भवेत्। सर्वमिदम् अदृष्टफलम् अनुमेयं भवति किं प्रत्यक्षफलमिति पर्यनुयोगः करणीयः एव।

**तीर्थप्रसादादिस्वीकरणेन वैज्ञानिकं फलम् –**

तीर्थे उपयुक्तानि द्रव्याणि सर्वाणि औषधान्येव भवन्ति। तेषां नित्योपयोगेन देहस्योल्लाद्यो भवति। श्रेयस्कामाः महर्षयः प्रजाभ्यः आचारान् बोधयामासुः, तेषु तीर्थग्रहणम् अन्यतमम्। तीर्थग्रहण-विधिः शास्त्रोपदिष्टोपि आरोग्यकारणं भवति। तीर्थे निक्षिप्तानि ओषधयः, जलम् इत्यादीनि द्रव्याणि उपयुक्तानि भवन्ति। विष्णोः आराधने स्नानपात्रम्, अर्घ्यपात्रं, पाद्यपात्रम्, आचमनपात्रं, शुद्धतोयपात्रमिति पञ्चपात्राणि प्रयुक्तानि भवन्ति। तेषु प्रतिपात्रं निक्षिप्तानां द्रव्यविशेषाणाम् आरोग्यप्रदं तत्त्वमन्तर्भूतं वर्तते।

**कुञ्चिकाशब्दाः –** समाराधन, स्नानद्रव्यम्, अर्घ्यद्रव्यम्, आचम-नद्रव्यम्, शुद्धतोयद्रव्यम्, सिद्धार्थ, अक्षत, गन्ध, घनसार, प्रियङ्गू इत्यादि।

**(1.) स्नानद्रव्येषु आरोग्यविज्ञानम् –**

**कर्पूरोशीरकं चैव (तक्कोलै)गन्धानेलालवङ्गकम् ।।76।।**
**स्नानद्रव्यमिदं प्रोक्तं (यथालाभमथापि वा) स्नानपात्रे तु निक्षि-पेत्।77।**[10]

एतेषां द्रव्याणां रोगहरत्वं आरोग्यप्रदायित्वं च आयुर्वेदविज्ञाने स्पष्टमुपदिष्टम्। **चरके अन्नपानीयाध्याये मात्राशीतीयाध्याये** च द्रव्याणां गुणाः बहुधा वर्णिताः। **चरकसंहितायाः सुश्रुतसंहितायाश्च** द्रव्यगुणान् गृहीत्वा गुणतत्त्वनिरूपकः **धन्वन्तरीनिघण्टु**रपि वैद्यशास्त्रे प्रसिद्धः। एवम् आयुर्वेदग्रन्थजातमनुसृत्य अर्चनोपयो-गिद्रव्याणाम् आरोग्यविज्ञानम् अस्मिन् परिशोधनपत्रे निरूपितम्।

**1. कर्पूरम् -** **सतिक्तः सुरभिः शीतः कर्पूरो लघुलेखनः ।**
**तृष्णायां मुखशोषे च वैरस्ये चापि पूजितः**[11] **।।**

धन्वन्तरीनिघण्टौ च कर्पूरस्य गुणाः एवं प्रतिपादिताः –

**कर्पूरं कटुकं तिक्तं मधुरं शिशिरं विदुः ।**
**त्रिदोषविषदाहाघ्नं क्षयमेहास्य गन्धवित् ।**
**चक्षुष्यं मदकृच्चैव स्त्रीणां द्रावणकृत्परम्**[12] **।।**

**2. उशीरम् –**

उशीरस्य नाना नामभिः प्रयोगो दृश्यते। **चरके सूत्रस्थाने चतुर्थाध्याये** उशीरं च चर्दिनिग्रहणं, स्तन्यवर्धकं च बहुधा प्रतिपा-दितम्। एवं विधानां दशद्रव्याणां मध्ये उशीरस्य पाठो दृश्यते।

उशीरस्यैव अभयं, समगन्धिकम् इत्यादीनि नामान्तराणि प्रसिद्धा-नि। तानि उशीराणि श्यामवर्णानि धवळवर्णानि च भवन्ति। द्वयोरपि वातहरत्वं रक्तदोषनिवारकत्वं मूर्छा मेह ज्वरहारकत्वं च आयुर्वेदे दृष्टम्।

**उशीरं शीतलं तिक्तं दाहवान्तिहारं च तत् ।**
**वातासृग्गरदोषघ्नं मूर्छामेहज्वरं हरेत्** [13]**।।**

**3. तक्कोलम् –**

अग्निबन्धनाम्ना प्रसिद्धोऽयं ओषधीविशेषः महातक्कली, क्षुद्रतक्कली इति भेदद्वयवान् भवति। पाण्डुरोगं, शोभं, श्लेष्मम्, अग्निमान्द्यम्, आमदोषं च हरति। यथा –

**तत्कारीकटुकातिक्ता तथोष्णा पाण्डुरोगजित् ।**
**शोफः श्लेष्माग्निमान्ध्याम विबन्धांश्च विनाशयेत्**[14] **।।**

**4. एलाः –**

एलाश्च सुगन्धयः, मुखदोषहराः प्रसिद्धाः एव। तासां पर्यायनामानि बहूनि प्रसिद्धानि। एलासु सूक्ष्मेला, स्थूलेला इति भेदद्वयं भवति। कटूष्ण आस्वादवत्यः, कास, कफ, रक्तदोष, अतिसारादि बहूनां रोगाणां निवारकाः।

**एलाद्वयं शीतलं तिक्तमुक्तं सुगन्धी पित्तार्तिकफहारि ।**
**करोति हृद्रोग मलार्तिवस्तिपुंस्वग्नमत्रस्तवीरा गुणाद्यः[15] ।।**

धन्वन्तरीनिघण्टुप्रोक्ताः एलाद्वयगुणाः। यथा –

**सूक्ष्मेला द्राविडीतुत्था गौराङ्गी बहुलात्रुटिः ।**
**एलाकपोतवर्णा च चन्द्रबाला च निष्कुटी ।।**
**एन्द्रभूता तथा द्रोणा सायको बहुलत्विषा ।**
**कङ्कोलेला बृद्वद्वेला त्रिपुटात्रि हितोद्धवा[16] ।।**

**5. लवङ्गाः –**

मेहशान्तिकारकाः, पैत्यरोगशमकाः, मधुमेहनिवारकाः, ज्वरनिवर्तिनः, शीतलाः, श्लेष्मककफहारकाः, रक्तशुद्धिकराः, हृदयादिस्थानशोधिनः, अग्निमान्द्यनिवर्तकाः प्रसिद्धाः। बुद्धिविकासहेतवः धातुपुष्टिकराः च।

**लवङ्गसेवा नरवीर्यदा च जितेन्द्रियं यौवनवर्धनं च ।**
**वातक्षयघ्नं कफश्वासकास कण्डूतिपित्तं न मधुनिहन्ति[17] ।।**

**(2) अर्घ्यद्रव्याणामारोग्यविज्ञानम् –**

**कुशाऽक्षततिलव्रीहियवमाषांस्तथैव च।।78।।**
**प्रियङ्गूंश्चैव सिद्धार्थानर्घ्यपात्रे तु निक्षिपेत्[18]।79।**

दर्भाः, अक्षताः, तिलाः, व्रीहि, यवाः, माषाः, प्रियङ्गवः, सिद्धार्थकाः इति द्रव्याष्टकं अर्घ्ये उपयोज्यम्।

**तेषु दर्भा –** वीर्यदुष्टतां परिहृत्य, पैत्यश्लेष्मजन्यान् दोषान् वारयन्ति। दर्भमूलाश्च पुराणविरेचनानां, रक्तश्राव, रक्तवमनादीनां निवारकाः।

**दर्भो बर्हिः कुशस्तीक्ष्णस्सूच्यग्रो यज्ञभूषणः ।**
**दर्भः कृच्छ्राश्मतृप्तिपत्तवस्तिरुक्षकफरक्तजित्[19] ।।**

**तिलगुणाः - उष्णास्त्वच्यो हिमः स्पर्शे केश्यो बल्यस्तिलो गुरुः।**
**अल्पमूत्रः कटुः पाके मेधाग्निकफपित्तकृत्[20]।।23।।**

**व्रीहिगुणाः - स्वादुपाकरसाः स्निग्धा वृष्या बद्धाल्पवर्चस।**
**कषायानुरसाः पथ्या लघवो मूत्रला हिमा[21]।।4।।**

**गोधूमाः –** चरके सूत्रस्थाने सप्तविंशे अध्याये गोधूमानां प्राशस्त्यं शूकधान्यवर्गे बहुधा वर्णितम्। गोधूमेषु नान्दीमुखी प्रभृतयोऽपि भेदाः बहुधा श्लाघिताः।

**सन्धानकृद्वातहरो गोधूमः स्वादुशीतलः ।**
**जीवनो बृंहणो वृष्यः स्निग्धः स्थैर्यकरो गुरुः ।।**
**नान्दीमुखी मधूली च मधुर स्निग्धशीतले ।**
**इत्ययं शूकधान्यानां पूर्वो वर्गः समाप्यते[22] ।।**

यवाः अपि एवंविधलक्षणवन्ताः।

**माषाः –** बलवीर्यवृद्धिकराः, शमीधान्यवर्गे दशगुणाः एवं प्रशस्ताः।

**वृष्यः परं वातहरः स्निग्धोष्णो मधुरो गुरुः ।**
**बल्यो बहुमलः पुंस्त्वं माषः शीघ्रं ददाति च ।।**
**राजमाषः सरो रुच्यः कफशुक्राम्लपित्तनुत् ।**
**तत्स्वादुर्वातलो रूक्षः कषायो विशदो गुरुः[23]।।**

**प्रियङ्गवः –** एते ज्वरकफहरिणः रक्तवृद्धिकारिमश्च।

**सिद्धार्थाः –** कफवातरात्र्यन्ध अग्निमान्द्यादिदोषनिवारकाः, उदररोगनिवारकाः।

**सर्षपः कटुतिक्तोष्णो वात श्लेष्मज्वरापहः ।**
**क्रिम्यामण्डूकुष्ठघ्नस्तथा शीतलानिलार्तिनुत्[24] ।।**

**(3) पाद्यद्रव्याणि –**

**विष्णुपर्णं पद्मदळं दूर्वां श्यामाकमेव च।।77।।**
**पाद्यद्रव्याणि सम्पाद्य पाद्यपात्रे तु निक्षिपेत्[25]।78।**
**पद्मं च विष्णुपर्णी च दूर्वाश्यामाकमेव च ।**
**चत्वारि पाद्यद्रव्याणि लब्धं वापि समाहरेत् ।।**

तेषां ओषधगुणाः यथा –

**पद्मम् – पद्मशीतालघुस्तिक्ता स्वादुश्चैव प्रकीर्तिता ।**
**रक्तकासारुचिं हन्ति पित्तदाह प्रशान्तिकृत्[26] ।।**

**विष्णुपर्णी – तमालिका रसे तिक्ता वीर्ये च शिशिरा मता ।**
**पित्तं हन्ति कफास्रघ्नी वस्तिदाहविनाशिनी ।**
**श्लेष्मदोषहरा रुच्या विशदा सुरभिर्लघुः[27] ।।**

**विष्णुक्रान्त –** कषाय पैत्य कफ पुराणदो,घ्नः, श्वासरोग निवारकः।

**दूर्वा –** प्रायशः दर्भलक्षणान्येव अत्रापि भवन्ति।

**श्यामकाः –** रक्तपैत्यवातग्रहणी प्रभृति दोषनिवारकाः।

**(4) आचमनद्रव्याणि –**

**एलोशीरलवङ्गादींस्तक्कोलानीति च क्रमात्।।79।।**
**क्षिपेदाचामपात्रे तु ..................[28] ।80।**

**एलालवङ्गोशीरादि तक्कोलादिचतुष्टयम् ।**
**आचामद्रव्यमित्युक्तं यथालाभमथापि वा ।।** एतेषां गुणाः प्राक् निरूपिताः।

**(5) शुद्धतोयपात्रद्रव्याणि –**

**...................... शुद्धतोये ततः क्रमात्।**
**पुष्पाणि गन्धान्विन्यसेद्यथालाभमथापि वा।।80।।**
**अलाभे तत्तदुच्चार्य तुळसीं वा विनिक्षिपेत्[29]।81।**
**पुष्पगन्धौ च विन्यसेच्छुद्धपात्रे च मध्यमे ।।**

**शुद्धतोयपात्रे तुलसी चन्दनं च मुख्यतया उपयुज्यते। चन्दनं च कान्तिप्रदं रक्तशुद्धिकरं, प्रतिदिनं तुलसीसेवनं नानाज्वरहारकमिति प्रसिद्धमेव।**

एवं प्रत्यहं भक्त्या अर्चनेन मानसिकशुद्धिः तीर्थप्रसादसेवनेन शारीरकशुद्धिः, मन्त्रपठनेन वाक् शुद्धिः इति त्रिकरणशुद्ध्या जन्मधन्यमिति आमुष्मिकविज्ञानेन समं लौकिक उपयोगोऽपि अर्चनाद्रव्यविनियोगात् साध्यः।

**संक्षिप्ताक्षरसूची –**

1. कृ.य.तै.सं – कृष्णयजुर्वेदीय तैत्तिरीयसंहिता
2. अ.को – अमरकोशः
3. श्रीवै.स्मा.सू – श्रीवैखानसस्मार्तसूत्रम्
4. मरीचि – विमानार्चनाकल्पः
5. प्रकीर्णा – प्रकीर्णाधिकारः
6. समूर्ता – समूर्तार्चनाधिकारः
7. अ.हृ - अष्टाङ्गहृदयम्
8. सु.सं - सुश्रुतसंहिता
9. ध.नि - धन्वन्तरीनिघण्टुः
10. च.सं - चरकसंहिता

**उपयुक्तग्रन्थसूची -**


1. **विमानार्चनाकल्प०ः –** मरीचिः, Edited – R.B. पार्थसारथि भट्टाचार्यः, श्रीवेङ्कटेश्वरस्वामिदेवस्थानम्, द्वारका तिरुमल, पश्चिमगोदावरि मण्डलम्, 1979.
2. **प्रकीर्णाधिकारः –** भृगुः, Edited – M.K. श्रीनिवास-भट्टाचार्यः, ति.ति.दे. प्रेस्, Series No-483, 1997.
3. **समूर्तार्चनाधिकरणम् –** अत्रिः, Edited – R.B. पार्थसारथि भट्टाचार्यः, ति.ति.दे. प्रेस्, Series No-489, 2001.
4. **कृष्णयजुर्वेदीय तैत्तिरीयसंहिता –** प्रकाशकः – आ. श्रीराममूर्तिः, सम्पादकः – आर्यसोमयाजुल वेङ्कटजगन्नाथरावु & सुब्रह्मण्यम्, & रविकृष्णमूर्तिः – कोत्तबेल्गाम्, पार्वतीपुरम्, मुद्रणवत्सरः – 2015.
5. **अमरकोशः –** अमरसिंहः, प्रकाशकः – कोण्डा शङ्करय्य बुक् डिपो, महाकाळिवीधि, सिकिन्दराबाद् (डक्कन्), मुद्रणवत्सरः – 1949.
6. **श्रीवैखानसस्मार्तसूत्रम् –** सम्पादकः – डा. मुळळपूडि जयसीतारामशास्त्रि, वेदान्तं गोपालकृष्णमाचार्यश्च, अनुसन्धान-प्रकाशनविभागः, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपति, मुद्रणवत्सरः – 2012. ISBN - 978-93-81887-03-5.
7. **सुश्रुतसंहिता –** सुश्रुतमहर्षिः, पार्ट्-1, Edited & Translater – Dr. Vasant C.Patil, Principal KL Institute of Ayurveda and Research, Savli, Vadodara. Dr. Rejeswari N.M., Associate Prof. Dept of Samhita & Siddhanta. Sdmcah, Hassan. Publisher – Chaukhambha Publications, New Delhi, 1st Edition – 2018. ISBN – 978-81-938519-4-4, Vol-1. Complete.
8. **धन्वन्तरीनिघण्टुः –** Editor & Translator – Dr. Amritpal Singh, Kashi Ayurveda Series No-71, Publisher - Chaukhambha Orientalia, Delhi, Edition Year – 2008, ISBN – 8189469126.
9. **अष्टाङ्गहृदयम् –** वाग्भटः, पार्ट् – 1, The Mohan das, Indological series No-80, Edited by – Kanjivlochan, Publisher & Printed – Chaukhambha Publications, New Delhi, Reprint-2019, ISBN – 978-93-81608-87-6, Vol 1.
10. **चरकसंहिता –** Jai Krishna das Ayurveda series no-36, Editer – Prof. Priyavrat Sharma, formerly director & post graduate Institute of Indian medicine, Benaras Hindu University, Vol-1. Publisher – Chaukhamba Orientalia, Varanasi, Reprinted Edition-2011, ISBN – 978-81-7636-012-7, Printer 0 Charu Printers, Near Gopal Mandir, Varanasi.


**पाद टिप्पणी –**

1. य.तै.सं – 5 काण्डः, 7 प्रश्नः
2. अ.को - 2-8-120
3. वि.कल्पः – 1 पटलः
4. कृ.य.तै.सं – 5 काण्डः, 5 प्रश्नः, 3 पनसः
5. श्रीवै.स्मा.सू – 4 प्रश्नः, 10 खण्डः, 96 सूत्रः
6. वि.कल्पः – 89 पटलः
7. समूर्ता – 78 अ
8. समूर्ता – 78 अ
9. समूर्ता – 78 अ
10. प्रकीर्णा – 18 अ
11. सु.सं - सूत्रस्थानम् 46-203, 204 श्लो
12. ध.नि – पुटसंख्या -122
13. ध.नि. - पुटसंख्या – 119
14. ध.नि. - पुटसंख्या – 30
15. अ.हृ. – सूत्रस्थानम् – 15 अ
16. ध.नि. - पुटसंख्या – 91
17. ध.नि. - पुटसंख्या – 99
18. प्रकीर्णा – 18 अ
19. ध.नि. - पुटसंख्या – 184
20. अ.हृ. – सूत्रस्थानम् – 6 अ, 23 श्लो
21. अ.हृ. – सूत्रस्थानम् – 6 अ, 4 श्लो
22. च.सं. – सूत्रस्थानम् – 23/21, 22 श्लोकाः, पुटसंख्या - 154)
23. च.सं. – सूत्रस्थानम् – 23/ 24, 25 श्लोकाः, पुटसंख्या – 155
24. ध.नि. - पुटसंख्या – 166
25. प्रकीर्णा – 18 अ
26. ध.नि. - पुटसंख्या – 173
27. ध.नि. - पुटसंख्या – 137
28. प्रकीर्णा – 18 अ
29. प्रकीर्णा – 18 अ